नं० ४८८७

नाम - वाञ्छाकल्पलतोपस्थान प्रयोगः

कर्ता - बुद्धिराजः ब्रजराजात्मजः

पत्र संख्या - ८ पत्राणि सं० x

विषयः - तंत्रम्

वाञ्छाकल्पलताप्रयोगः

५४४१

५४४१ / ४ पृ०

ॐ श्रीगणेशाय नमः विमृश्याथर्वणं वेदं कौमारीसंहितां तथा वाञ्छामनोर्विधिः सम्यग्बुद्धिराजेन
तन्यते १ अथ वाञ्छाकल्पलताउद्धारो यथा प्रयोगपारिजाताख्ये आथर्वणे महेश्वर उवाच तुरीया
१ मर्धरात्रे च कुर्य्यात्संध्यां विधानवित् दिनार्कमंडले देवीध्यानमन्यत्पुरोक्तवत् २ तुरीयकूटं विद्या
याः पद्मरागसमप्रभं त्रयोदशाद्वराकारं सहस्रारांबुजे स्मरेत् ३ ब्रह्मरन्ध्रासापुटेनाथ बहिस्ताकमण्ड
लात् आवाह्य परमाकाशे स्मरेद्देवीं तदुद्भवां ४ अथोक्तरूपिणीं पश्चात्तुरीयं कूटमुच्चरन् दद्यादर्घ्य
त्रयं तस्यै तेनैव त्रिः प्रतर्पयेत् ५ जपेत्तुरीयगायत्री प्राणायामादिपूर्वकं कालनित्यामूलविद्यामष्टो
त्तरशतं जपेत् ६ तुरीयकूटमेनावत्संख्यं जप्यं निवेदयेत् संस्तुत्वा परमाकाशे सहस्रारवराटके ७
समुद्वासयेत् तथात्मानं ध्यायेत्कामकलात्मकं एतद्विद्योपासकानामेतत्संध्याचतुष्टयं ८ आवश्य
कं न चान्येषां मन्त्राणां समुदीरितं बाह्याशक्तौ ध्यानरूपा संध्यानक्तं विधीयते ९ उपस्थानं कल्पयित्वा
विद्यायाः समुदीरितं नांरवा वंश्रियं मायां वाग्भ्यां कामं वराहकं १० वराहकं नाम ह्सौं तुन्पर्थः गणेशबी.

१

जेगुगुरीतनतः पंचदशाक्षरी ऐं क्लीं सौः कथितं बीजत्रितयं त्रैपुरं ततः ११ पूर्वानुषंगपंचकोनत्रिंशद्भिः कथि
तोऽक्षरैः पर्यायेष्वनुषंगाभ्यां च तेष्वपि पठेदृचः १२ ऋचो यदद्यकद्वाभ्यामानुलोम्येन षट् पठेत् नार्ध्येव
प्रातिलोम्येन पुनः षष्ठीं विना पठेत् १३ एवमेकादशार्चः स्युरनुषंगद्वयान्विताः गं द्विप्रप्रसादनायस्वा
हागणपतयेनतः १४ योजयेद्वरवरदायपाशमायांकुशां सतः सर्वजनं मे वशमानयस्वाहेति वै पठेत् १५
सौः क्लीं ऐं मिति चान्ते स्यादनुषंगोऽयमुत्तरः द्वेऽपुत्तरानुषंगोऽयं भवेत्षाड्विंशदक्षरः १६ पूर्वोत्तरानुषंगाभ्यां
पठेदेकादशाप्यृचः एकादशाप्यृचः यद्यप्येकादशाप्यृचस्तेनैकादशैवानुषंगे ऋचउक्ताः तथापि ता
रादिमंत्रे बालान्ते इत्यादि बालायाः प्रतिरोहितं तेनैव चाग्रे वक्ष्यमाणत्वात्पूर्वोत्तरानुषंगाभ्यामित्यत्रापि शब्दे
न द्वादशीमपि पूर्वोत्तरानुषंगाभ्यां योजयेदित्यर्थः यदद्यकंच गायत्रीत्र्यंबकं जातवेदसे १६ समानो मंत्र इत्ये
ताः प्रातिलोम्याद्दशाभवन् षष्ठीं तु प्रतिपर्यायं भिन्नाभिन्नामुदीरयेत् १७ संसमिद्युवसे सं गच्छध्वमिति
एके समानो मंत्र स्तात्रीयि समानी वस्तु तथर्वके १८ एकादशीं पठित्वैवमष्टं च द्वादशीं पठेत् भिन्नाभिन्ना
द्वादश्युः पर्यायेषु चतुर्ष्वपि १९ गणानां त्वा गणपतिमग्रे मन्तुमतः परं योमामग्रेत्तनीये स्याद्जेष्मायाव

नर्थके २० व्याहृतीः प्रथमं प्रोक्ता मद्रं नट्विति मंत्रकः ततश्चाद्येनु भद्रं नो मरुतामोजसेततः २१ तृतीये द्वंद्वो विश्वस्य वां ते
शन्नो भवेतिवै ततः पठेदों ह्रीं वंठ मस्त ततो रुद्राय वै ततः २२ पाशं मायांकुशाद्यन्त्या प्रतिकूलं मद्रूपतः न
२ श्यनुत्वनुकूलं मेवशमानय पठह्वयं २३ इमयंतीन लाभ्यां चेतः शृगद्वयं च ततपरं नारी ह्रीं वंठ मित्यादि चतुर्थ्यवस
मं भवेत् २४ एकैव पंचमीषष्ठीसप्तमीचतृतीयके एवं कल्पलताख्योपस्थानस्यैष क्रमो भवेत् २५ प्रयोग
पारिजाताख्येत्राथर्वण विधिः स्मृतः इति वाञ्छाउद्धारः समाप्तः अन्यत्रापि कुमारसंहितायां श्रीशिवउ
वाच श्रृणु देवि प्रवक्ष्यामि वाञ्छाकल्पलतामनुं श्रीविद्यागणनाथस्य रहस्यं परमाद्भुतं १ आदौ गुरुं गणाध्य
क्षं देवं यालं सरस्वतीं नत्वास्य मंत्रमुच्चार्य कृत्वा तालत्रयं ततः २ प्राणानायम्य मूलेन तेनात्र व्यापयेदपि त
नो मंत्रन्यं कुर्यादृषिदैवतपूर्वकं ३ अस्य विद्यागणेशस्य वाञ्छाकल्पलतामनोः नानासूक्तसमुद्रस्य ऋषयः
कथिता मया ४ आनंदभैरवो देवो गणकः सर्वमंत्रवित् आंगिरसः कश्यपश्च वसिष्ठ ऋषिसत्तमाः ५ विश्वामि
त्रश्च संवादो नानाऋषिहृदाहृतः छंदांसि सर्वत्र ज्ञातव्यानि पृथक् पृथक् ६ देवी पृथ्वीनिचृत् पूर्वा गायत्र्यनुष्टु
प् तथा देवता च महादेवी श्रीमत्त्रिपुरसुंदरी ७ गणेशाग्निश्च संवादोऽस्मिताख्यो हृदयं च श्रीं ह्रीं क्लीं बीज शक्ती च कीं

२

ध्यर्थे विनियोग इहोच्यते ॥ ह्रीं श्रीं बीजशक्तिः स्वाहा कीलकमुच्यते ॥ ९ ॥ करांगन्यासभेदस्य विधिरेष इहोच्यते
बालां प्रथममुच्चार्य संबुध्या सुंदरीं वदेत् ॥ १० ॥ ह्रीमुक्त्वाऽनुक्रमेणैव सर्वज्ञायै वदेत्ततः ॥ मायां च जातिभिः
षड्भिर्दीर्घाभ्यैह्न्तामिति प्रिये ॥ ११ ॥ दीर्घसंयुक्तगं बीजैः पंचभिर्ब्रह्मभिः क्रमात् ॥ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदा
शिवः ॥ सर्वात्मनश्च देवेशि कृत्वान्नित्यं षडंगकम् ॥ १२ ॥ हिमाद्रौ हेमपीठेति ध्यात्वा श्रीत्रिपुरां पराम् ॥ बीजापूरेति वि
घ्नेशं धवलेत्यादिनापि च ॥ १३ ॥ ध्याम्यामित्युदितं ध्यानं सर्वतंत्रेतदुच्यते ॥ स्फुरितेति शिवं ध्यायेत्सर्वकामार्थसि
द्धिदम् ॥ १४ ॥ एवं ध्यात्वा शुभे देवी तद्भेदेन च साधकः ॥ ध्यानानि प्रयोगे वक्ष्यन्ते ॥ १५ ॥ प्रजपेदिष्टसिध्यर्थं विद्या
ग्रहणसंयुतः ॥ तद्भेदेन वैदिकमंत्रभेदेनेत्यर्थः ॥ विद्याग्रहणं दीक्षेत्यर्थः ॥ १६ ॥ अथवा रं जपेन्नित्यं सर्वामीष्टम
वाप्नुयात् ॥ जपेत्सोऽन्त्रा साहस्रं तर्पणं हुतियोगतः ॥ १७ ॥ श्रीविद्यायाश्च सर्वार्थसाधिन्याः साधितं मनु
म् ॥ पुरश्चर्याविधानेन साधकः सर्वदा जपेत् ॥ १८ ॥ धर्ममर्थं च कामं च देवतैक्यं च विंदति ॥ किमित्र ब
हुनोक्तेन यद्यदिच्छति साधकः ॥ १९ ॥ तत्सर्वं लभते नित्यं वाञ्छाकल्पलतामनोः ॥ आनुपूर्व्या च तत्स्वभे
दं सूक्तं चैव पृथक् पृथक् ॥ २० ॥ साधकानां सुबोधाय वाञ्छितार्थप्रसिद्धये ॥ २१ ॥ श्रीशिव उवाच ॥ मंत्रोऽ

३॥ रमरोषेण प्रवक्ष्यामि कुलेश्वरि ॥ अप्रकाश्योऽयमुद्धारः सर्वत्र हितकांक्षिभिः ॥ २२ ॥ तारं वाग्भवरमाभुवने
श्रीवाघकामधरणीगणनाथात् ॥ पञ्चबीजयुगलं सुरिरीघं श्रीमहात्रिपुरसुंदरीमनुः ॥ २३ ॥ तत्सुतामनुम
थादितो वदेत् तं वदेद्यपदघकव्वेन्द्रकः ॥ विप्रबीजमनु वर्ण्य साधको मंत्रराजमथ संवदेत्क्रमात् ॥ २४ ॥ क्षि
प्रप्रसादनायेति तथा गणपतिं वदेत् ॥ चतुर्थ्या वरवरद पदमुक्त्वा वदेत्ततः ॥ २५ ॥ पादुरंगीतं कुरु सर्वजनं मे
वशमानय ॥ अवरोहेण बालायाः स्वाहांते त्र्यक्षरीं वदेत् ॥ २६ ॥ तत्सुतां बालाबीजत्रयमित्यर्थः ॥ पञ्चबीजयुग
लं नाम गुरुरिति ज्ञेयम् । मंत्रराजे क्षिप्रगणपतेरित्यर्थः ॥ तारादि मंत्रे बालांते वदेत्सावित्रि कामपि ॥ त्र्यंबकम
नुं जातवेदो मंत्रमथो वदेत् ॥ २७ ॥ समानो मंत्रमप्यत्र संप्रमिमुव सतथा ॥ एवमारोहमार्गेण प्रोक्ता स्त्र्यंत्रजा(?)
तयः ॥ २८ ॥ समानो मंत्रमारभ्य प्रतिरोहं वदेत्ततः ॥ ऋचं यदघक्षेति प्रतिरोहावसानकं ॥ २९ ॥ गणानां त्वाहवं वा
पिहृद्धश्रीयोजयेदिह ॥ बालायाः प्रतिरोहांते वदेत्तद्भ्रुवोत्तरम् ॥ ३० ॥ व्याहृतिं प्रथमामुक्त्वा भद्रं नो मंत्रमावदे
त् ॥ प्रणवं भुवनेशीं च वंठं बीजद्वयं वदेत् ॥ ३१ ॥ वदेदमृते हृद्धं च चतुर्थं पात्रबीजकम् ॥ हृल्लेखामंकुशं प्रोक्त्वा ॥३॥
प्रतिकूलं पदं वदेत् ॥ ३२ ॥ मेमस्य त्वनुकूलं मे द्विवं देवशमानय ॥ वह्निजायां तमुक्त्वाऽथ नल स्त्रं वदेत्ततः ॥ ३३

नलस्सक्तं दमयंतीं न लाभ्यामिति ॥ जपित्वैवं चतुर्वारमेकावृत्तिर्भवेत्तदा ॥ अष्टवारं जपेन्नित्यमिष्टसिद्धिर्भ
विष्यति ॥ ३४ ॥ त्र्यम्बकादि यद्येति गायत्री त्र्यंबकं तथा ॥ जातवेद समानश्च संसमिद्युवसे तथा ॥ ३५ ॥ एवमारोह
रूपोऽहमवरोहस्तथोच्यते ॥ समानो मंत्रमाख्याय यद्येति त्र्यंगतके ॥ ३६ ॥ आरोहे तु द्वितीयस्य दलस्यापि त
थोच्यते ॥ संगच्छेति वदेत् षष्ठे अवरोहः समानकः ॥ ३७ ॥ अत्रापि द्वादशीस्थाने अग्ने मन्युं वदेन्मनुं ॥ द्विती
यां व्याहृतिं प्रोक्ता मरुतामोजसे वदेत् ॥ ३८ ॥ तृतीयस्य दलस्यापि षष्ठीस्थाने तथा वदेत् ॥ समानो मंत्र मंत्रापि द्वा
दशी योजयेत्तथा ॥ ३९ ॥ यो मामग्ने जपित्वा तु वह्निजायांतमावदेत् ॥ तृतीयां व्याहृतीं ब्रूयादिन्द्रो विश्वस्य राजति
॥ ४० ॥ दलस्यापि चतुर्थस्य षष्ठस्थाने तथा वदेत् ॥ समानीव त्र्यंबकं चैव अजे भाद्वादशीं भवेत् ॥ ४१ ॥ त्र्यंगं ते तु जपेत्तत्र
व्याहृतित्रितयं क्रमात् ॥ ततः शान्तो भव ब्रूयाद्द्विपदे शं चतुष्पदे ॥ ४२ ॥ उत्तरं दलमप्यत्र योजनीयं महेश्वरि ॥ ज
पित्वा साधकश्रेष्ठ चतुर्वारं पृथक् पृथक् ॥ ४३ ॥ इत्येतत्कथितं गुह्यं भुक्तिमुक्तिप्रदायकम् ॥ जपेत्सोऽन्यसाहस्रं
षट्सहस्रमथापि च ॥ ४४ ॥ पायसेन हुनेद्देवि नारिकेलफलैस्तिलैः ॥ असाध्यं साधयेल्लोके अवश्यं वशमान ये
येत् ॥ ४५ ॥ किमत्र बहुनोक्तेन सर्वान्कामानवाप्नुयात् ॥ ४६ ॥ इति कौमारसंहितायां वाञ्छाकल्पलतामंत्रोद्धा

रो नाम महादन्ता: परन्तपः ॥ तंत्रांतरे ॥ वाञ्छाकल्पलतायास्तु न होमो न च तर्पणं ॥ स्मरणादेव विद्यायाय यदिच्छ
॥४॥ सितं तद्भवेत् ॥ १ ॥ एकावृत्त्या वशे लक्ष्मी पंचावृत्त्या वशं जगत् ॥ दशावृत्त्या तथा विष्णुरुद्रशक्तिर्भवेदिह ॥ २
सार्वभौमः शतावृत्त्या भवत्येव न संशयः ॥ तंत्रांतरेपि ॥ आवर्त्तनत्रये लक्ष्मीः पंचावृत्त्यै जगद्वशं ॥ दशावृत्तौ त्रि
वादीनां देवानां शक्तिभाग्भवेत् ॥ लक्षावृत्तौ सार्वभौमो दरिद्रोपि भवेन्नरः ॥ नार्थवादोऽथर्वणस्य वसिष्ठवचनं
यथा ॥ पुरश्चरणे त्ववश्यं होमः ॥ वाञ्छाकल्पलतास्वेति नित्यपरम् ॥ अथ मूलवाक्यानुसारी प्रयोगः ॥ तु
रीयां संध्यां विधाय हेमाद्रावितिध्याने कालविधानान्निश्चयं त्वयामेवाञ्छां कल्पलतां जपं कुर्यात् ॥ एतज्ज
पस्य मुख्यकालस्तु रात्रौ यामत्रयादूर्ध्वं सूर्योदयावधि ॥ यथा ॥ श्रीगुरुभ्यो नमः ॥ श्रीगणेशाय नमः ॥ श्रीक्षे
त्रपालाय नमः ॥ सरस्वत्यै नमः ॥ श्रीमत्त्रिपुरसुंदर्यै नमः ॥ मूलमुच्चार्य तालत्रयं कृत्वा मूलेन प्राणायाम
त्रयं कृत्वा ॥ ॐ ३ म्र अस्य श्रीवाञ्छाकल्पलताविद्यागणेशस्य मनोर्नाना सूक्तसमूहस्य आनंदभैर
वगलकांगिरसकश्यप वसिष्ठ विश्वामित्र सवन नारूषयः ॥ देवीगायत्रीनिचृद्गायत्रीपंक्त्यनुष्टुप्त्रिष्टुप्त्रि ॥४
ष्टुप्त्रिष्टुब्जगत्यश्छंदांसि ॥ श्रीमन्महात्रिपुरसुंदरी गणपति संवादात्म्य मन्त्ररूद्रा देवताः ॥ श्रीबीजम् ॥ ह्रीं श

क्तिः ॥ क्लीं कीलकम् ॥ मम श्रीमहागणपति महात्रिपुरसुंदरी संवादाख्यमंत्र हृद्य प्रसाद वाञ्छितार्थ फलप्रसि
द्धये वाञ्छाकल्पलतोपस्थाने अथ को मा संहितामते ऽनुष्टुप् बृहत्यधिका संप्रदायिन स्तत्पंक्त्यनुष्टुप् गाय
त्र्युष्णिकस्त्रिष्टुप् जगत्यश्छंदांसि विनियोग इति संकल्प्य· आनंद भैरव गण कां जिर सकश्यप वसिष्ठ विश्वामि
त्र संवननाऋषिभ्यो नमः शिरसि· देवी गायत्री निचृद्गायत्री पंक्त्यनुष्टुब् जगत्यश्छंदोभ्यो नमो मुखे· श्रीमत्त्रि
पुरसुंदरी महागणपति संवादाख्यमंत्र हृद्भ्यो नमो हृदि· श्रीं बीजाय नमो नाभौ· ह्रीं शक्तये नमो गुह्ये· क्लीं
कीलकाय नमो आधारे· ततो मूलेन व्यापकं चरेत् ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं क ए ई ल ह्रीं गणपतये ह स क ह ल ह्रीं
वरवरद स क ल ह्रीं सर्वजनं मे वशमानय स्वाहा ॥ इति त्रिचत्वारिंशदर्णो मनुः ॥ ऐं क्लीं सौः श्रीमत्त्रिपुरसुंदरी ह्रीं स
र्वज्ञायै ह्रां गां ब्रह्मात्मने अंगुष्ठाभ्यां नमः ॥ ऐं ११ ह्रीं नित्यतृप्तायै ह्रीं गीं विष्ण्वात्मने तर्जनीभ्यां स्वाहा ॥ ऐं ११
ह्रीं अनादिबोधितायै ह्रूं गूं रुद्रात्मने मध्यमाभ्यां वषट् ॥ ऐं ११ ह्रीं स्वतंत्रायै ह्रैं गैं ईश्वरात्मने अनामिकाभ्यां
हुं ॥ ऐं ११ ह्रीं नित्यमनलुप्तायै ह्रौं गौं सदाशिवात्मने कनिष्ठिकाभ्यां वौषट् ॥ ऐं ११ ह्रीं अनंतायै ह्रः गः सर्वा
त्मने करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिन्यासं विधाय· पुनर्मूलेन त्रिर्व्यापय्य ध्यायेत्· यथा· हेमा

द्वीपे हेमपीठस्थितममरगणैरीड्यमानं विराजत्पुष्पेष्विक्ष्वासिपाशांकुशाकरकमलां रक्तवेषातिरक्तां ॥ दिक्षु प
॥५॥ ड्क्ष्वृतुभिर्मणिमयकलशैः पंचशक्त्यैकविधास्वर्णं कृताभिषेकां भजति भगवतीं भूतिदामंत्ययामे ॥१॥ बीजापू
रगदेक्षुकार्मुकरुजा चक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशः प्रोद्यत्करांभोरुहः ॥ ध्येयो वल्लभया
सपद्मकरयाश्लिष्टोज्ज्वलद्भूषया विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥२॥ धवलनलिन
राजश्चंद्रमध्येनिषण्णं स्वकरधृतवरपाशं साभयं सांकुशं च ॥ अमृततवपुषमिन्दुक्षीरवर्णं त्रिनेत्रं प्रणम
त सुरवंद्यं मंत्रसंवादयंतं ॥३॥ स्फुटितनलिनसंस्थं मौलिवद्धेंदुरेखागलदमृततरसार्द्रं चंद्रवह्न्यर्कने
त्रम् ॥ स्वकरकलितमुद्राबेदपाशाक्षमालां स्फटिकरजतमुक्तागौरिमीशं नमामि ॥४॥ मुद्राज्ञानमुद्रेत्य
र्घः ॥ इति ध्यात्वा मुद्राः प्रदर्श्य श्रीमत्त्रिपुरसुंदरीमहागणपतिसंवादाख्यमत्त रुद्रेभ्यो लं पृथिव्यात्मकं
गंधं समर्पयामि नमः इति कनिष्ठिकांगुष्ठाभ्यां दद्यात् ॥ श्रीमत्त्रिपुर० देभ्यो हं आकाशात्मकं पुष्पं समर्पयामि
नमः इति तर्जन्यंगुष्ठाभ्यां दद्यात् ॥ श्रीमत्त्रिपुरसु० देभ्यो यं वायव्यात्मकं धूपं समर्पयामि नमः इत्यंगुष्ठतर्जनीभ्यां ॥५॥
दद्यात् ॥ श्रीमत्त्रिपुर० देभ्यो रं वह्न्यात्मकं दीपं समर्पयामि नमः इति मध्यमांगुष्ठाभ्यां दद्यात् ॥ श्रीमत्त्रिपुर० दे

भ्योवं अमृतात्मकं नैवेद्यं समर्पयामि नमः इत्यनामिकाङ्गुष्ठाभ्यां दद्यात् ॥ श्रीमत्त्रिपुर० देभ्यः सं सर्वात्म
कं तांबूलं समर्पयामि नमः इति सर्वाङ्गुलीभिर्दद्यादिति मानसोपचारैः संपूज्य ॥ गुरुदेवतात्मनोरैक्यं भा
वयित्वा शनैः शनैर्जपेत् ॥ यथा ॥ ओं ऐं श्रीं ह्रीं लं क्लीं ग्लौं गं गुरुगुरी कूं लं ह्रीं हसकहलह्रीं ऐं क्लीं सौः ॥ यदद्य कच्च
वृत्रहन्नुदगा अभि सूर्य ॥ सर्वं तदिन्द्र ते वशे ॥ गं क्षिप्रप्रसादनाय गणपतये वरवरद ओं ह्रीं क्रौं सर्वजनं मे वशमा
नय स्वाहा सौः क्लीं ऐं ॥ १ ॥ ओं ऐं श्रीं० सौः ॥ २९ ॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ गं क्षिप्र
प्र० ऐं ३६ ॥ २ ॥ ओं ऐं श्रीं० सौः २९ ॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्
गं क्षिप्र० ऐं ३६ ॥ ३ ॥ ओं ऐं श्रीं० सौः ॥ २९ ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ॥ स नः पर्षदति दुर्गाणि वि
श्वा नावेव सिंधुं दुरितात्यग्निः गं क्षिप्र० ३६ ऐं ॥ ४ ॥ ओं ऐं श्रीं० २९ सौः समानो मंत्रः समितिः समानी समानं मनः
सह चित्तमेषां समानं मंत्रमभिमंत्रये वः समानेन वो हविषा जुहोमि० गं क्षिप्र० ३६ ऐं ॥ ५ ॥ ओं ऐं श्रीं० २९ सौः संस
मिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ॥ इलस्पदे समिध्यसे स नो वसून्याभर गं क्षिप्र० ३६ ऐं ॥ ६ ॥ ओं ऐं श्रीं० २९ सौः
समानो मंत्रः० मेषां । समानं० जुहोमि० गं क्षिप्र० ३६ ऐं ॥ ७ ॥ ओं ऐं श्रीं० २९ सौः जातवेदसे० वेदः ॥ स नः पर्ष० ताऽत्य

॥६॥

ग्निः। गंक्षिप्र० ३६ ऐं १०८ ७॥ ओं ऐं श्रीं० २९ सौः त्र्यंबकं यजा० र्डुनं। उर्वारु० तात्। गंक्षिप्र० ३६ ऐं ॥८७ ८॥ ओं ऐं श्रीं० २९ सौः

तत्सवितु० मुहि। धियो० यात्। गंक्षिप्र० ३६ ऐं ॥९॥ ओं ऐं श्रीं० २९ सौः यदद्य० सूर्य सर्वं० वशे। गंक्षिप्र० ३६ ऐं ॥१०॥ ओं

ऐं श्रीं० २९ सौः गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम्॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः

शृण्वन्नूतिभिः सीद सादनं। गंक्षिप्र० ३६ ऐं ॥११॥ ॐ भूः भद्रं नो अपि वातय मनः १२ ॐ ह्रीं वं ठं अमृतरूपाय आं ह्रीं

क्रों प्रतिकूलं मे नरपत्वनुकूलं मे वशमानय स्वाहा॥ १२ दमयंती नलाभ्यां च नमस्कारं करोम्यहं० अविवादो भवेदत्र

कलिदोषप्रशांतिदः॥ ऐकमत्यं भवेदेषां ब्राह्मणानां पथि श्रियाम्॥ निर्वैरता च जायेत संवादाग्नेः प्रसीद मे॥ ६६ ॥ इ

ति प्रथमः पर्यायः॥ १॥ ओं ऐं श्रीं० २९ सौः यदद्य० वशे० गंक्षिप्र० ३६ ऐं ॥१॥ ओं ऐं श्रीं० २९ सौः तत्सवितुर्वरेण्यं० द्या

त्। गंक्षिप्र० ३६ ऐं ॥२॥ ओं ऐं श्रीं० २९ सौः त्र्यंबकं० मृतात्। गंक्षिप्र० ३६ ऐं ॥३॥ ओं ऐं श्रीं० २९ सौः जातवेदसे० त्यग्निः

गंक्षिप्र० ३६ ऐं ॥४॥ ओं ऐं श्रीं० २९ सौः समानो मंत्रः० जुहोमि गंक्षिप्र० ३६ ऐं ॥५॥ ओं ऐं श्रीं० २९ सौः संगच्छध्वं संव

दध्वं सं वो मनांसि जानतां॥ देवा भागं यथा पूर्वे संजानाना उपासते० गंक्षिप्र० ३६ ऐं ॥६॥ ॐ ऐं श्रीं० २९ सौः समानो मं०

मि० गंक्षिप्र० ३६ ऐं ॥७॥ ॐ ऐं श्रीं० २९ सौः जातवेद० त्यग्निः। गंक्षिप्र० ३६ ऐं ॥८॥ ॐ ऐं श्रीं० २९ सौः त्र्यंबकं० मृतात्॥ ॥६॥

गं क्षिप्र॰ ऐं ॥९॥ ॐ ऐं श्रीं॰ २९ सौः तत्सवितु॰ द्यात्॰ गं क्षिप्र॰ ३६ ऐं ॥१०॥ ॐ ऐं श्रीं॰ २९ सौः यद्द्य॰ वशो॰ गं क्षिप्र॰
३६ ऐं ॥११॥ ॐ ऐं श्रीं॰ २९ सौः अग्नेमन्युं प्रतिनुदन्परेषामदब्धो गोपाः परिपाहि नस्त्वं ॥ प्रत्यंचो यंतु निगुतः पुनस्ते
रमैषां चित्तं प्रबुधां विनेशात् ॥ गं क्षिप्र॰ ३६ ऐं ॥१२॥ ॐ उभ्रू भुवः मरुतामोजसे॰ ॐ ह्रीं वं दं अमृतरुद्राय आं ह्रीं क्रों
प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा॰ ॥ दमयंती नलाभ्यां च नमस्कारं करोम्यहं ॥ अविवादो भवेत्तत्र
कलिदोषप्रशांतिदः ॥१॥ ऐकमत्यं भवेदेषां ब्राह्मणानां पृथग्विधां ॥ निर्वैरता च जायेत संवादाग्ने प्रसीद मे ॥ १४ इति
हृतीपापपर्यायः ॥२॥ ॐ ऐं श्रीं॰ २९ सौः यद्द्यकच्च॰ वशो॰ गं क्षिप्र॰ ३६ ऐं १ ॐ ऐं श्रीं॰ २९ सौः तत्सवितु॰ यात्॰ गं क्षि
प्र॰ ३६ ऐं ॥२॥ ॐ ऐं श्रीं॰ २९ सौः त्रियंबकं॰ मृतात्॰ गं क्षिप्र॰ ३६ ऐं ३ ॐ ऐं श्रीं॰ २९ सौः जातवेदसे॰ त्यग्निः गं क्षि
प्र॰ ३६ ऐं ॥४॥ ॐ ऐं श्रीं॰ सौः समानो मंत्रः॰ जुहोमि॰ गं क्षिप्र॰ ३६ ऐं ॥५॥ ॐ ऐं श्रीं॰ २९ सौः समानो मंत्रः॰ जुहोमि॰
गं क्षिप्र॰ ३६ ऐं ॥६॥ ॐ ऐं श्रीं॰ २९ सौः समानो मंत्रः॰ जुहोमि॰ गं क्षिप्र॰ ३६ ऐं ७ ॐ ऐं श्रीं॰ २९ सौः जातवेदसे॰
त्यग्निः गं क्षिप्र॰ ३६ ऐं ॥८॥ ॐ ऐं श्रीं॰ २९ सौः त्रियंबकं॰ मृतात् ॥ गं क्षिप्र॰ ३६ ऐं ॥९॥ ॐ ऐं श्रीं॰ २९ सौः तत्सवितु॰ या
त्॰ गं क्षिप्र॰ ३६ ऐं ॥१०॥ ॐ ऐं श्रीं॰ २९ सौः यद्द्यकच्च॰ तेवशे॰ गं क्षिप्र॰ ३६ ऐं ॥११॥ ॐ ऐं श्रीं॰ २९ सौः योमामग्ने भा

७॥ गिनं संतमथाभागं चिकीर्षति॥ अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा॥ गं क्षिप्र० ३६ ऐं॥१४॥ ॐ भुवः
इन्द्रो विश्वस्य राजति॰ ॐ ह्रीं वं हं अमृतरूपाय आं ह्रीं क्रों प्रतिकूलं मे नस्य त्वनुकूलं मे वशमानय स्वाहा॥ दमय
न्तीनलाभ्यां च नमस्कारं करोम्यहं॥ अविवाहि भवेद्दत्र कलिदोषप्रशान्तिदः॥ एकमत्यं भवेदेषां ब्राह्मणानां प्र
पृच्छितां॥ निर्वैरता च जायेत संवादाग्ने प्रसीद मे॥ ६४ ॥इति तृतीयापूर्यायः॥ ॐ ऐं श्रीं० २९ सौः यदद्य० बत्रो०
गं क्षिप्र० ३६ ऐं॥१॥ ॐ ऐं श्रीं० २९ सौः तत्सवितुर्व० यात्० गं क्षिप्र० ३६ ऐं॥२॥ ॐ ऐं श्रीं० २९ सौः त्रियंबकं० मृतात्०
गं क्षिप्र० ३६ ऐं॥३॥ ॐ ऐं श्रीं० २९ सौः जातवेदसे० त्यग्निः गं० क्षिप्र० ३६ ऐं॥४॥ ॐ ऐं श्रीं० २९ सौः समानो मं
त्रः० जुहोमि० गं क्षिप्र० ३६ ऐं॥५॥ ॐ ऐं श्रीं० २९ सौः समानी व आकूतिः समाना हृदयानि वः॥ समानमस्तु वो
मनो यथा वः सुसहासति० गं० क्षिप्र० ३६ ऐं॥६॥ ॐ ऐं श्रीं० २९ सौः समानो मंत्रः० जुहोमि० गं० क्षिप्र० ३६ ऐं ७
ॐ ऐं श्रीं० सौः जातवेदसे० त्यग्निः गं क्षिप्र० ३६ ऐं॥८॥ ॐ ऐं श्रीं० २९ सौः त्रियंबकं० मृतात्० गं क्षिप्र० ३६ ऐं ९
ॐ ऐं श्रीं० २९ सौः तत्सवितुः० यात्० गं० क्षिप्र० ३६ ऐं॥१०॥ ॐ ऐं श्रीं० २९ सौः यदद्य० बत्रो० गं० क्षिप्र० ३६ ऐं॥११॥ ॥७॥ ८
ॐ ऐं श्रीं० २९ सौः अजैष्माद्यासनाम्छ्चाभूमानागसो वयम्॥ जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स

१०५

८ गच्छतु यो नो द्वेष्टि तमच्छतु॰ गंस्तिप्र॰ ३ध ऐं ॥१२॥ ॐ भूर्भुवः स्वः शन्नो भवद्द्विपदे शं चतुष्पदे ॥ ॐ ह्लुंवः
हं अमृततरुश्चय आं ह्रीं क्रौं प्रतिकूलं मेनस्यत्वनुकूलं मेवशमानय स्वाहा॰ ॥ दमयंतीनलाभ्यां च नमस्का
रं करोम्यहं ॥ अविवादो भवेदत्र कलिदोषप्रशांतिदः ॥ ऐकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम् ॥ निर्वैरता
च या जायेत संवादान्मे प्रसीदमे ॥२॥ इति चतुर्थः पर्यायः ॥४॥ इति जपित्वा॰ गुह्यातिगुह्यगोप्त्री त्वं गृहा
णास्मत्कृतं जपम् ॥ सिद्धिर्भवतु देवेशि त्वत्प्रसादान्महेश्वरि इति जपं निवेदयेत् ॥ ॥ इति वाञ्छाकल्पलताप्र
योगो मूलवाक्यतः ॥ उद्धृत्य बुद्धिराजेन व्रजराजात्मजेन वै ॥१॥ प्रयोगपारिजाताख्याद्वर्णात्सु विमृश्य
च ॥ कुमारसंहितां चैव विचार्य प्रोक्त एव हि ॥२॥ उपस्थानं कल्पलताविद्यायाः परिकीर्तितं ॥ निर्मत्सरैः सु
धीवृंदैर्ध्येयः स्वेष्टार्थसिद्धये ॥३॥ इति श्रीमत्त्रिपुरसुंदर्या वाञ्छाकल्पलतोपस्थानः ॥ प्रयोगः समा
प्तः ॥ दैवात्प्रमादादेकदिनजपलोपेऽपि अनन्तरदिनेन वाञ्छाकल्पलतामंत्रस्यैकमष्टोत्तरशतावृत्तिः क ८
र्तव्या एतदेव प्रायश्चित्तमिति॰ एवं प्रत्यहं निशांते चतुर्वारं पठेत्तः सर्वैश्वर्यं भवति सर्ववेदांतफलमश्नु
ते इति शम् ॥ ॥ ॥

७॥ वस्ता
२

तंत्रमंत्र

पत्रे ४ नुमेपाए
नंदलाले पत्रे ८
श्रीराजासाहे श्री १८०
बरामसिंघ
जीके वास्ते मंगाया थ्या १९४६ फ०५ २०

नं. ४८८७

॥ ७॥
तंत्रस